International Journal of Scientific Research in Science and Technology
Print ISSN: 2395-6011 | Online ISSN: 2395-602X (www.ijsrst.com)

# वैष्णवसम्प्रदाये धर्मशास्त्रे: विभाग बीजान्वेषणाम् स्थानानि श्रीनारायणदासमहाराजानां विमर्श:

**मुकेश कुमार डागर:**
**(धर्मशास्त्राचार्य:) (अनुसन्धाता)**
**ज.रा.राज.सं.वि.वि.जयपुरम्**

**Article Info**
May-June-2012
Page Number : 419-437
**Publication Issue :**
Volume IV, Issue II
**Article History**
Accepted : 01 May 2012
Published : 28 May 2012

**सनातनधर्मशास्त्रस्य भूमिका-** विदितमेव तत्र भवतामास्तिकजनानां धर्मधूरीणानां यदिह जगतीतले चतुरशीतिलक्षयोनिषु जन्मपरम्परामनुभूयानेकजन्मार्जितपुण्यप्रभावैर्मनुष्यशरीरमासादयति जीवलोक:। तदुक्तम् –

कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् । इति ।

तदिदं मनुष्यशरीरं लब्ध्वाऽपि नैव सर्वोऽपि जीवलोक: जन्मपरम्परामनुभवन् दु:खसागरमुत्तरीतुं प्रभवति, किन्तु तत्राधिकतरा: पुनरपि ता एव चतुरशीतिलक्षयोनिषु जन्मपरम्परा अनुभवितुं प्रवर्तते। तादृग्विधे च वैषम्ये नान्यदुपलभ्यते मूलम्, ऋते पुण्यपापयो:। पुण्यपापयोश्च प्राणिकर्तृकं कर्म एव मूलमिति। किं कर्म पुण्यजनकं किञ्च पापजनकमिति गवेषणीयम्। तत्र च तद्बोधको वेद एवेति।

इदानीमस्माकं देशे धर्मशब्द: सम्प्रदायशब्दश्च विवादस्य विषय: जात:। किमत्र कारणं न जाने परन्तु धर्म विना सामाजिकानां व्यवहार: असम्भव:। मनुष्यस्यासाधारणो धर्म: मनुष्यता तया विहीन: पशु: असुरो वा। अनेन ज्ञायते सर्वेषु वस्तुषु पदार्थेषु च सामान्येन एक:, असाधारणो धर्म: भवत्येव। येन धर्मेण तद्वस्तुन: अस्तित्वं लोके स्वीक्रियते। अत: धर्म: सर्वै: सेवनीय: धारणीयश्च।

आनन्दभाष्यानुसारं धर्मस्य लक्षणम् –

धर्मो नाम स्ववर्णाश्रमाचारानुष्ठानजन्य: पुण्यक्षालित:।

अन्त: करणे गंगाप्रवाहवदविच्छिन्नपरमपुरुषानुरागविशिष्टा परमपुरुषप्रीतिरूप:।

वैशेषिकदर्शनानुसारम् –

यतोऽभ्युदय नि:श्रेयससिद्धि: स धर्म:।

मनुस्मृतौ –

धृति: क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रह:।
धीविद्यासत्यमक्रोधो दशकं धर्मलक्षणम् ॥

अद्य बहव: धर्माचार्या: ये सन्ति ते कर्त्तव्यविरहिता: मठाधीशा: भूत्वा शोभन्ते तेषां यत् सामाजिकं कर्त्तव्यनिर्वहणं पूर्वाचार्यै: प्रदत्तमासीत्। तस्मात् कर्त्तव्यनिर्वहणात् ते विमुखा: दृश्यन्ते। आदिशङ्कराचार्येण भारतस्य चतुर्दिक्षु चत्वारिपीठानि

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

संस्थापितानि तेष्वपि पीठेषु सम्प्रति कलेः मलिनः प्रभावः दृष्टिगोचरो भवति। सर्वत्र कलहः प्रपञ्च एव दृश्यते। अस्मिन् शोधप्रबन्धे स्वामिवर्याणां जीवनवृत्तं, कार्य तथा राष्ट्रियमहत्त्वस्य विवरणं च वर्णयिष्यते। महात्मनां जीवनं सांसारिकानामुपकाराय एव भवति। तत्सर्वं मन्ये स्वामिपादानां जीवने दरीदृश्यते।

अत्र विचार्यते सम्प्रदायशब्दः व्याकरणशास्त्रदृष्ट्या सम्प्रोपसर्गपूर्वकात् दाधातुयोगे निष्पन्नोऽयं शब्दः। अथाम्नायः सम्प्रदायः इति कोषवचनानुसारं

गुरुपरम्परया प्राप्यते यत् तत्सम्प्रदायः अथवा उपदेशाय प्रचलितः सम्प्रदायशब्दः । सम्प्रदायशब्दः तन्त्रग्रन्थे बहुधा व्युत्पादितः। सम्यक्प्रदीयते शास्त्ररीत्या परम्परया वा शिष्येभ्यः इति सम्प्रदायः । अत्र स्वभावतः प्रश्न उदेति शिष्येभ्यः किं प्रदीयते । भौतिकं वस्तु अन्यो वा पदार्थः। गुरु शिष्याणां कल्याणाय आध्यात्मिकी विद्यां, मन्त्रं गोपनीयं च ज्ञानं प्रयच्छति। विद्यादीनां संग्रहः कदाचिदपि केवलेन पुस्तकज्ञानेन कर्तुं न शक्यते। पुस्तके सर्वं लिखितं भवति किन्तु गुरुं विना तल्लिखितं ज्ञानमपि अज्ञानस्य निवारणे नालं प्रतीयते। समुद्रे जलानामायतनं सर्वत्र प्रसिद्धम्। जलं दृष्ट्वा कदाचिजनः समीपं गच्छति परन्तु न तज्जलं क्षुधायाः (पिपासायाः) शान्तये उपकल्प्यते। अत एव गुरोः महत्त्वमनादिकालात् ग्रन्थादौ प्रतिपादितम्।

रामानन्दसम्प्रदायस्य बीजं वेदादौ विराजते, न तत्र सन्देहः। रामानन्दशब्दः .. अपि सम्प्रदाये वैष्णवैः बहुधा विचारितः। रामानन्दशब्दे द्वौ शब्दौ दृश्यते । रामः

आनन्दश्च। विचारकाणां मते रामः स्वयमेव आनन्दस्वरूपः सच्चिदानन्दविग्रहः तर्हि पुनः आनन्दशब्दः कथमत्र प्रदत्तः। निरुक्तकारस्य वचनमस्ति।

रकारो रामचन्द्रः स्यान्मकारो लक्ष्मणः स्वराट्।
अकारो जानकी प्रोक्ता तयोः संयोजनाय च ॥

पुनराभ्यासे भूयां समर्थो मन्यते । यद्यत्र पुनराभ्यासः कदाचित् स्यात् तथापि अर्थगौरवाय एव स्वीकर्तव्यः। अन्यत्र रामानन्दशब्दविषयेऽयं विचारः दृष्टिगतो भवति। रकार इति उच्चारणमात्रेण श्रीरामचन्द्रं सच्चिदानन्दं श्रृणोति। तत्रैव आकारस्य उच्चारणमात्रेण भगवतीं जानकी सच्चिदानन्दविग्रहां श्रृणोति । पुनः मकारस्य उच्चारणात् शेषावतारं श्रीलक्ष्मणं श्रीमन्नारायणावतारं वा श्रृणोति । अन्ते च आनन्दशब्दस्योच्चारणेन एते त्रितयाः सच्चिदानन्दरूपा इति ज्ञायते।

रामानन्दसम्प्रदाये समेषां वर्णानां जातीनामाढ्यानामकिञ्चनानां ज्ञानिनां, जडानाञ्च स्त्रीपुरुषाणां बालवृद्धानाञ्च समादरः श्रूयते। यथा गान्धिदर्शने समेषामभेदेन समादरः तथैव रामानन्दस्य सम्प्रदाये।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारतः।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥

स्वप्रतिज्ञानुसारं धर्मरक्षणाय भगवान् सदैव भारतभूमाववतरति। यदा यवना भारतभुवमाचक्रमुः सर्वत्रात्याचारानकार्षुः। हिन्दूनां मन्दिराणि मूर्तयश्च बलात् बभञ्जः। हिन्दवो हठान्मुस्लिमधर्मे परिवर्तिताः। ये मुस्लिमधर्मं न स्वीचक्रुस्तेषां शिरांसि छिन्नानि। हिन्दुस्त्रियोऽपाहरन्। सम्राजोऽन्तःपुरे शतशः स्त्रियो भोगिनीत्वेनन्यवात्सुः। शास्त्राणि भ्राष्टेषु प्राज्वालयन् निरागसः सहस्त्रशो हिन्दव आततायिभिर्यमलोकं प्रापिताः। हिन्दूराजानः परस्परमेवायुध्यन्। असंघटितास्ते मुस्लिमसैनिकैः पराजिता अभूवन्। एतादृशे अत्याचारग्रस्ते धर्मविलोपसमये धर्मरक्षायै साधुजनपालनाय भगवान् श्रीरामः[रक] वैक्रमवत्सरे माघकृष्णसप्तम्यां श्रीरामानन्दरूपेण प्रादुर्बभूव, तीर्थराजप्रयागे परमभागवतस्य भूसुरश्रेष्ठस्य श्रीपुण्यसदनमहाभागस्य धर्मपत्न्याः सुशीलादेव्या गर्भात् परित्राणाय साधूनां विनाशाय च दुष्कृतां भगवान् श्रीरामानन्दः प्रादुरभूत् ।

ग्रन्थेऽस्मिन् मया प्रायेण सर्वे विषयाः समालोचिताः एकादभिरध्यायैविभक्तोऽयं प्रबन्धः महाराजस्य पुण्यकर्मणाः श्रीनारायणदासस्य व्यक्तित्वं कृतित्वञ्च विभर्ति । अग्रे सहयोगकर्तृणां समेषामाचार्याणां मित्राणाञ्च कृते कार्तज्ञं निवेदयामि।

वैष्णव सम्प्रदाये रामानन्दसम्प्रदाश्च सम्प्रदाश्च मीमांसा

नमोऽस्तु रामाय स लक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै।
नमोऽस्तु रूद्रेन्द्र यमा निलेभ्यो,
नमोऽस्तु चन्द्रार्क मरुद्गणेभ्यः।।[1]

समग्रभूमण्डलस्य ललामभूतो भारतदेशः उपासनायाः दार्शनिकविचारस्य, चिन्तनस्य, विद्यायाश्च उत्सरूपः केन्द्रस्थानं च विद्यते। अस्मिन् देशे उपासनायाः वैविध्यं ग्रामे ग्रामे गेहे गेहे किम्पुनः एकस्मिन्नैव गृहे व्यक्तिभेदेन द्रष्टुं शक्यते। परिवारमध्ये उपासनायां सर्वे स्वतन्त्राः सन्ति ते यथेच्छया स्वेष्टदेवान् उपासन्ते। उपासनायाः स्थलं समं भवति उपास्यदेवस्य स्वरूपं भिद्यते पद्धतिश्च भिन्ना एव तथापि उपासकानां मध्ये कलहः नैव दृश्यते सर्वे प्रेम्णा सहैव प्रलपन्ति हसन्ति वसन्ति च अहो परमेश्वरस्य लीला। बहुत्र एकस्मिन्नेव पूजागृहे नैकाः प्रतिमाः स्थाप्यन्ते देवतानां बाहुल्यं भारतवर्षे वैदिककालादेव अङ्गीक्रियते । यथा यजुर्वेदे –

ये देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ।
ते देवासो यज्ञमिमञ्जुषध्वम्।।[2]

पुनः शतपथब्राह्मणे –

"त्रयस्त्रिंशद्देवाः[3]

अस्माकं देशे प्रामुख्येन शैव – शाक्त – गाणपत्य – वैष्णवाश्च संप्रदायेषु विभक्ताः वर्तन्ते। संप्रदाये च एकदेवस्योपासना नैव श्रूयते। भारतीय मन्दिरेषु पञ्चायतनानां परिकल्पना प्राचीनकालादारभ्य वर्तमानकालेनैरन्तर्येण प्रचलति प्रसंगानुरोधेन पञ्चायतन विचारः क्रियते –

**आदित्यं गणनाथं च देवीं रुद्रं च केशवम्।**
**पञ्चदैवतमित्युक्तं सर्वकर्मसु पूजयेत् ।।**

शालग्रामशिलायाः महत्त्वं पुराणादौ विशेषेण भणितम्। आकार प्रकारभेदेन शिलायाः महत्त्वं निगदितम्। देवीभागवतमहापुराणे शालग्रामशिला विषये विशिष्टं चिन्तनं कृतम्। गृहस्थस्य कृते कीदृशी शिला कामनाभेदेन प्रशस्ता स्यात् इति सर्वं तत्र वर्णितम्। सामान्येन या शिला प्रशस्ता सा वर्ण्यते –

**शिलाप्यामलकी तुल्या पूज्या सूक्ष्मैवयाभवेत् ।**
**यथा यथा शिला सूक्ष्मा तथा स्यात्तुमहत्फलम् ।।**[4]
**पक्वजम्बूफलाकारं कुक्कुट्टाण्ड समाकृतिः।**
**भुक्तिमुक्तिप्रदं चैव बाणलिङ्गमुदाहृतम् ।।** [5]
**शुण्डादण्डेन दन्ताभ्यां शोभनाभ्यामलङ्कृता।**
**एकेन वाथ दन्तेन रक्तबिन्दुभिरन्विता ।।**
**पार्श्वभागैकवदना वक्राभ्यां शोभिता च या।**
**गणेशमूर्तिः सा ज्ञेया विघ्नाद्योघविनाशिनी ।**[6]
**वाह्येवाभ्यान्तरे वापि चक्रदादश संयुता।**
**सूर्यमूर्तिरिति ख्याता सर्वव्याधिविनाशिनी ।।**
**गर्ने वा गर्तमध्ये वा योन्याकारेण चिन्तिता।**
**योनेरूपरिमध्ये वा कुण्डलीभूतसर्पवत् ।।**

**अर्धाधिका त्रिरेखाभिर्भूषिता या शिलाशुभा।**

**शक्तिकुण्डलिनी सातु देवानामपि दुर्लभा॥**

**शक्तिकुण्डलिनी देवी नित्यं यः पूजयेन्नरः।[7]**

इंद्रादि दुर्लभान् भोगान् भुक्त्वा निर्वाणमाप्नुयात् ।। उपर्युक्ताभिः कारिकाभिः सुस्पष्टमिदं पञ्चदेवतानां पूजनं कर्मणः आदौ सर्वैः एव उपासकैः विधेयम्। कारिकायां देवतानां नाम भेदेन आकारभेदः
सुनिश्चत एव। उपासनायाः कश्चित् विधिः भवति तेनैव विधिना पूजनेन उपासकस्य मनोभिलषितं कामं पूरयति पूजितः देवः। विधिहीना क्रिया विफला भवति तथा पूजकस्याभीष्ट विनाशाय च जायते। उक्तञ्च भगवद्गीतायां –

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाभिरहितं यज्ञं तामसं परिचक्षते ।।[8]

भारतीय चिन्तनपद्धतौ पञ्चायतनस्य परिकल्पना पुरातनास्ति न तत्र सन्दिह्यते। पञ्चायतन निर्माणकाले सर्वतोभावेन विचारणीय यत् यस्य देवस्य पञ्चायतनं संपाद्यते स खलु सर्वेषां मध्ये स्थिरो भवेत् अयं भावः प्रमुख देवस्य मूर्तिः मध्ये स्थाप्यते अन्ये च चतुर्पुकोणेषु भवन्ति तद्यथा –

गणेशपञ्चायतनं सर्वादौ मीमांस्यते यथा चोक्तं ज्ञानमालायाम् –

हेरम्बं तु यदा मध्ये ऐशान्यामच्युतं यजेत् ।
आग्नेयां पञ्चवक्त्रं तु नैऋत्यां धुमणि[9] यजेत्॥
वायव्यामम्बिकां चैव यजेन्नित्यमतन्द्रितः॥[10]

अथ विष्णुपञ्चायतनम् –

यदा तु मध्ये गोविन्दमीशान्यां शंकरं यजेत् ।
आग्नेय्यां गणनाथं च नैऋत्यां तपनं तथा॥
वायव्याम्बिकां चैव यजेन्नित्यं समाहितः॥

शिवपञ्चायतनम् –

यदा तु शंकरं मध्ये ऐशान्यां श्रीपतिं यजेत् ।
आग्नेय्यां च तथा हंसं नैऋत्यां पार्वतीसुतम् ।।
वायव्यं च सदा पूज्या भवानी भक्तवत्सला ।।

सूर्यस्य पञ्चायतनम् –

सहस्रांशुर्यदा मध्ये ऐशान्यां पार्वतीपतिम् ।
आग्नेय्यामेकदन्तं च नैऋत्यामच्युतं तथा ।
वायव्यां पूजयेद्देवीं भोगमोक्षकभूमिकाम् ।।

देवीपञ्चायतनम्

भवानीं तु यदा मध्ये ऐशान्यां माधवं यजेत् ।
आग्नेयां पार्वतीनाथं नैऋत्यां गणनायकम्॥
प्रद्योतनं तु वायव्यामाचार्यस्तु प्रपूजयेत् ॥

तथा च वोपदेवः –

शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शङ्करेभास्येनागसुता रवौ हरगणेशाजाम्बिकायाः स्थापयेत्।

देव्यां विष्णुहरैकदन्तरवयो लम्बोदरऽजेश्वरेनार्या: शंकरभागतोऽतिसुखदा व्यस्तास्तु हानिप्रदा:।।

अस्यायमभिप्राय: यस्य देवस्य देवालये यत्स्थानं निर्दिष्टं तत्रैव स्थापयेत् । स्थानभ्रष्टे पूजकस्य हानि: श्रूयते तद्यथा –

"स्वस्थान वर्जिता देवा: शोकदु:खभयप्रदा:।[11]

गृहस्थानां कृते स्मृत्यादौ उपासनायां विशेष: नियम: प्रतिपादित: । गृहस्थ: कदाचिदपि एकदेवोपासक: नैव भवेत्। गृहस्था: विविध कामयुक्ता: दृश्यन्ते तस्मात् कामनाभेदेन यथा श्रौते यागभेद: निरूपित:। स्वर्गकामाय दर्शपूर्णमास याग:। उद्भिदा यजेत् पशुकाम:। दघ्नेन्द्रियकामस्य जुहुयात्। सर्वस्वार नामक: याग: मरणकामस्य । स्मार्ते च फलभेदेन देवानामनुष्ठानं विहितम्। श्रीमद्भागवते व्यास: लिलेख: –

**'आरोग्यं भास्करादिच्छेत्'**[12]

ग्रन्थानामध्ययने सुस्थिर: सिद्धान्त: गृहस्थ: बहुदेवस्योपासनायां रतो भूत्वा कामभेदेन मनोभिलषितं साधयेत् । यथाचाह –

**"एकामूर्तिर्न पूज्यैव गृहिणा स्वेष्टमिच्छता।**

**अनेकमूर्ति सम्पन्न: सर्वान् कामानवाप्नुयात् ।।**[13]

**गृहे लिङ्गद्वयं नार्य गणेशत्रितयं तथा।**

**शङ्खद्वयं तथा सूर्यो नाच्यौ शक्तित्रयं तथा।**

**द्वे चक्रे द्वारकायाश्च शालिग्रामशिलाद्वयम्।**

**तेषां तु पूजनेनैव उद्वेगं प्राप्नुयाद्गृही।।**

पुराणानामध्ययनेन ज्ञायते विष्णवादिदेवानां पूजा नित्या नैव वर्तते । समाजेषु यावन्तो विभागा: सम्प्रदायस्य वर्तन्ते ते सर्वे कल्पिता एव। पूर्वाचार्याणां विभाग: ज्ञायते। द्विजा: ब्राह्मणक्षत्रिय – वैश्या: संप्रदायेषु विभक्ता: दृश्यन्ते तच्च विभाग: उपासनाया: कृते भवति।

सामान्येन द्विजानां कृते गायत्री उपासना नित्या प्रतिपादिता। गायत्रीजपनिष्ठो द्विज: भवगतीमाराध्य भोगमोक्षं च प्राप्नोति उक्तञ्च –

सर्वे शाक्ता: द्विजा: प्रोक्ता: न शैवा: न च वैष्णवा:।

आदिशक्तिमुपासन्ते गायत्रीं वेदमातरम्[14] ।।

गायन्तं त्रायते यस्मात् गायत्रीति तत: स्मृता। गायत्र्या: उपासना उपनीतैर्द्विजै: एव कर्त्तव्या विद्यते। अनुपनीतानां नास्ति प्रसंग:। वर्णाश्रमधर्मस्य साक्षात् प्रभावोऽत्र प्रतीयते। वैदिकसनातनधर्मस्य साक्षात् विज्ञानं कर्तुं शक्यते। गायत्र्या: उपासना विशिष्टेन विधिना स्मृता। सर्वत्र शास्त्रमेव प्रमाणमावहति। भारतवर्षस्य प्राचीना संस्मृति: तत्र प्रमाणभूता ज्ञायते। द्विजकुलोत्पन्नानां पुरुषाणामेव गायत्रीश्रवणेऽधिकार: प्रसृत:। यद्यपि साम्प्रतिकेऽर्थ युगे

ध्वनिप्रसारकयन्त्रमाध्यमेन गायत्र्या: पुनीतमन्त्रस्य सर्वै: श्रूयते किन्तु अत्रेदं बोध्यं सामाजिकानां पथप्रदर्शनाय शास्त्रमेव प्रमाणं भवति । धर्मनिर्णये बहुमतस्य निर्णय: नैव अङ्गीकार्य:। उक्तञ्च –

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ**[15] **।**

पुनस्तत्रैव –

**य: शास्त्रविधिमुत्सृज्य वर्तते कामकारत:।**

**न स सिद्धिमवाप्नोति न सुखं न परांगतिम् ।।**[16]

वैष्णवसम्प्रदाय: –

भगवतः इदं भागवतम्। भगवान् पदेन विष्णुः प्रसिद्धः। भारतस्य सुप्रसिद्धो विद्वान् – डा वाचस्पति गैरोला महोदयस्य मतं वर्तते – भागवतसम्प्रदायस्यापरं नाम वैष्णवसम्प्रदायो विद्यते। वैष्णवसंप्रदायः पुरातनो मन्यते। इतिहासकाराणां शब्दावल्यां प्रागैतिहासकालकः वैष्णवसम्प्रदायः। दक्षिणभारते सम्प्रदायस्यास्य प्रादुर्भूतोऽभवत्। तत्रत्याः अलवारजातीय विशिष्टाः वैष्णव धर्मस्य प्रचारकाः अभूवन् –

महाभारतकालिके पञ्चरात्रमते वैष्णवसम्प्रदायस्यैव विवरणं प्राप्यते। बौद्धाः जैनाश्च पञ्चरात्रमतस्य विरोधिनः आसन् तत्प्रभावात् पञ्चरात्रस्य प्रभाव

किञ्चित् शिथिलतां गतः परन्तु कालक्रमेण शंकराचार्यप्रभृति विदुषां प्रयासेन नवीनामूर्जा धारयन् पञ्चरात्रमतं पुनः प्रसृतम्।

अष्टमशताब्दात् वैष्णवधर्मस्यानेके विभागाः अभवन्। विशिष्टाद्वैत सम्प्रदायः वैष्णवसम्प्रदायस्यैकभागः स्वीक्रियते। विशिष्टाद्वैतवादिनः अधिकाः सन्ति। दार्शनिकः प्रस्तारश्च विस्तृतो मन्यते। बहूनि साहित्यानि अद्यावधि ग्रन्थागारेषु प्रकाशनाभावात् संरक्षितानि सन्ति। नवीनाचार्याः ये भवन्ति प्रायेण प्राचीनानां ग्रन्थानामध्ययने व्यस्ताः दृश्यन्ते। न जाने कदा अप्रकाशितानां साहित्यानां प्रकाशनं भविष्यति।

वैष्णवधर्मस्य विकासः प्राचीन समयेऽभवत् नास्तिसन्देहस्यावसरः। अस्य प्रवर्तकाः त्रयः आचार्याः आसन् ।

अग्रेऽपि अनेके आचार्याः सम्प्रदायस्य पोषकाः सन्ति तेषु केचन स्मर्यन्ते तिरुमिडिशः, शाठारिः अथवा शठरिपुः, मधुरकविः, कुलशेखरः, पेरिया अलवारः, गोंदाप्रभतयः, स्वनामधन्याः आचार्याः परिगण्यन्ते।

प्रायेण उपर्युक्ताः पंक्तिपावनाः आचार्याः भक्ताः एव कीर्त्यन्ते तेषां सारस्वतं कार्यं नैवोपलभ्यते। वैष्णवधर्मस्य विशिष्टाद्वैत विभागस्य संस्थापकः भगवान् नारायणः मन्यते।

भगवान् नारायणः लक्ष्म्यै संप्रदायस्य ज्ञानं ददौ अनन्तरञ्च उपदेशस्य एका परम्परा उपलभ्यते तद्यथा –

वैकुण्ठपार्षदः, विष्वक्सेनः, शठकोपाचार्यः, नाथमुनिः, पुण्डरीकाक्षः, यामुनाचार्यः, रामानुजाचार्यश्च।

यामुनाचार्यात् प्राक् केचन भाष्यकाराः बभूवुः बौधायनाचार्यः (उपवर्षः) ब्रह्मानन्दी, द्रामिलाचार्यः, ग्रहदेवः, टंकः, श्रीवत्सांकश्चेति वैष्णव संप्रदायस्य मीमांसा विंशति अध्यायेषु विभक्ताविद्यते। यस्यान्तर्विभागः त्रिषु काण्डेषु कर्तुं शक्यते – धर्ममीमांसा, देवमीमांसा तथा च ब्रह्ममीमांसा। धर्ममीमांसायां द्वादश अध्यायाः सन्ति अस्याः प्रवर्तकः व्यासशिष्यः जैमिनिः आसीत् । काशकृत्स्नाचार्यस्य देवमीमांसा श्रूयते यस्यां चत्वारोध्यायाः प्राप्यन्ते। ब्रह्म मीमांसायाञ्च चत्वारोध्यायाः अस्याः रचनाकारः बादरायणो व्यासः बभूव। आसु तिस्त्रिषु मीमांसासु क्रमेण कर्मोपासनाज्ञानानि च वर्णितानि सन्ति। अस्यां परम्परायां आश्मरथ्य नामकस्याचार्यस्य नाम श्रूयते यो हि विशिष्टाद्वैत सिद्धान्तस्य तत्वचिन्तकः मन्यते। अग्रे पुनः श्रीकण्ठाचार्यः 'ब्रह्मसूत्र' ग्रन्थस्य शिवतत्वव्याख्याने तत्परो भूत्वा सम्प्रदायस्याभिवृद्ध्यै महत्त्वपूर्ण योगदानमदात्। श्रीकण्ठस्य कालः पञ्चमः शताब्दं ज्ञायते। ब्रह्मसूत्रस्य व्याख्याने यामुनाचार्यस्य अग्रगण्यं स्थानं दृश्यते। अनेनाचार्येण ग्रन्थस्य व्याख्यानावसरे ब्रह्मपदं विष्णुमङ्गीकृतम्। विष्णोः परमात्मनः सर्वस्वं भवति स एव संसारस्य पालकः तत्सेवया च जीवस्य कल्याणं भवेत् अन्यथा संसारे दुर्गतिः भवति। यामुनाचार्यस्य कार्य अग्रेसारयन् सुप्रसिद्धः आचार्यः स्वनामधन्यः वैष्णवसिरोमणिः रामानुजाचार्यः प्रमेयादिचिन्तनेन अतिगंभीरं कार्य ततान। रामानुजाचार्यः व्याकरणन्यायादि सकलशास्त्रे अभूतपूर्वः आसीत्। रामानुजस्य कार्यं वर्तमानकालेऽपि प्रासंगिकतां भजते । रामानुजाचार्यस्य प्रयासस्य सत्फलं यत् समग्रे भारते वर्षे वैष्णवसम्प्रदायस्य बाहुल्यं दृश्यते। शंकराचार्यः शैवमतस्य किं वा अद्वैतसिद्धान्तस्य पुरोधा आसीत्। आचार्यशंकरस्य ब्रह्मसिद्धान्तः समालोचकानां मते व्यापको नास्ति तत्रैव रामानुजस्य गंभीरं चिन्तनं सर्वजनहिताय प्रतीयते। रामानुजः कालस्य प्रभावं जानाति स्म तस्मात् शंकराचार्यस्य भाष्ये यत्र कुत्रापि सन्देहः आसीत् तस्य सर्वस्य समाधानं कुर्वन् विशिष्टाद्वैत सिद्धान्ते अङ्गीचकार। रामानुजस्य सिद्धान्तः वैष्णव सम्प्रदाये समादरणीयः प्रतीयते । रामानुजाचार्यस्य जन्म विक्रम संवत् १०७४ मध्ये मन्यते। अनन्तरं अस्मिन् संप्रदाये अनेके आचार्याः बभूवुः ते सन्ति –

देवराजाचार्यः, वरदाचार्यः, सुदर्शनव्यासः, भट्टाचार्यः, वरदाचार्यः, (द्वितीयः) वीरराघवाचार्यः, वादिहंसाबुवाचार्यः, वेंकटनाथः, श्रीमल्लेकायाय् वरद्गुरुः, वरदनायकसूरिः, अनन्ताचार्यः, रामानुजदासः, सुदर्शनगुरुः, श्रीनिवासाचार्यः, बुच्चिवेंकटाचार्यः। एतेषामाचार्यचरणानां कालः चतुर्दशख्रीष्टाब्दात् अष्टादशख्रीष्टाब्दं यावत् मन्यते।

रामानन्दसम्प्रदाये "वैष्णवमताब्जभास्करः" रामार्चनपद्धतिश्च प्रमाणभूतो ग्रन्थोऽस्ति। अनयोः रचनाकारः रामानन्दाचार्यो बभूव। रामार्चनपद्धतिः कर्मकाण्डस्य ज्ञानाय प्रवृत्ता। वैष्णवमताब्जभास्करे रामानन्दस्य सुप्रसिद्धः शिष्यः सुरसुरानन्दाचार्यः दशप्रश्नान् अपृच्छत् । ते प्रश्नाः –

1. किं तत्वमसि?
2. कस्य जपः कार्यः?
3. ध्यान्विधौ किमिष्टम्?
4. किं मुक्तेः साधनम्?
5. श्रेष्ठतमः धर्मः कः?
6. वैष्णवः कतिविधः?
7. किं वैष्णवां लक्ष्यम्?
8. वैष्णवः काल यापनं कथं कुर्युः?
9. तेषां वासः कुत्र भवेत्?
10. वैष्णवेभ्यः उपदेशः?

एतेषां दशप्रश्नानां समाधानं कुर्वन् कलिमकल्मषदहनः भगवान् रामानन्दाचार्यः स्वमतं पोषयामास। प्रयुक्तग्रन्थस्य सम्यगवगाहनेन रामनन्दसम्प्रदायस्य सैद्धान्तिकं किञ्चित्ज्ञानं भवति। सम्प्रदायविशेषस्य ग्रन्थविशेषस्याध्यनेन तत्वावगाहनं सुदुष्करमेव। यतोहि सम्प्रदायस्य अनेके सिद्धान्ताः लिपिबद्धाः नैव भवन्ति तत्तु परम्परया सम्प्रदाये दीक्षितो भूत्वैव ज्ञातुं शक्यते । यथातन्त्रस्य व्याख्यान ग्रन्थे भाष्यकारः बहुत्र लिखितवान् 'इदं रहस्यं' परम्परया गुरुः सकाशात् ज्ञेयम्। किं तत्र वक्तुं शक्यते व्याख्याकारः तस्मिन् स्थले न जानाति तस्मात् तत्र तथा लिखितम्। इदं नास्ति। तथापि मया कश्चित् शोधदृष्ट्या प्रयासो विधीयते येन रामानन्दसम्प्रदायस्य तत्वज्ञानं उत्पद्येत् ।

रामानन्दसम्प्रदाये विविधानि तत्वानि स्वीकृतानि। ईश्वरः, जीवः (चित्तं) अचित अर्थात् माया। परं तत्वे त्रीणि निगूढानि सन्ति। एतानि त्रीणि नित्यानि वर्तन्ते। माया त्रिगुणात्मिका महदादिपदार्थानां प्रसविणी व्यापारे च निष्क्रिया भाति।

ईश्वरः सर्वज्ञः शक्तिसम्पन्नः, अजरामरः निष्कलंकः सनातनः मोवाग्भ्यामगम्यः वर्तते। ईश्वरः ज्ञानरूपः माया च अज्ञानरूपा ईश्वरः विभुः व्याकश्च माया अणुस्वरूपा। ईश्वरः मायायां वसति कूटस्थः भूत्वा मायामध्ये स्थित्वा विभुंरूपं प्रकाशयति।

मायेश्वरौ च उभावपि विश्वोत्पादकौ स्तः। माया तु विश्वयोनिः सर्वत्र प्रसिद्धा। अनया विना ईश्वरः सण्टुं समर्थो नास्ति। मायया प्रेरित ईश्वरः सृजति पुनः सर्गस्य नियमनं रक्षणञ्च अन्ते च संहरणमित्युक्तम्। माया स्वयमेव ब्रह्मणि लीना वर्तते तस्मादीश्वरः विश्वस्य उत्पादको मन्यते। विश्वस्योपादनकारणभूतः साक्षात् ईश्वरः। साक्षात् संकल्पमयेन निमत्त कारणोऽसौ तथा अन्तसाक्ष्यतया सहकारी कारणम्। ईश्वरः, जीवः, माया च परब्रह्मणः त्रिपादविभूतिः भवति समस्तोऽपि व्यक्त प्रपञ्चः लीलाविभूतिः कथ्यते तस्मादुक्तं नारदभक्ति सूत्रे –

"लोकवत्तु लीला कैवल्यम्[17]

जीवेऽपि ईश्वरस्यानेके गुणाः राजन्ते। सत् – चित् – आनन्दाश्च त्रयोऽपि जीवे प्राप्यन्ते । जीवोऽपि नित्यस्वरूप एव । उक्तञ्च गीतायाम्

"अजो नित्यः शाश्वतोऽयं पुराणः[18]

जीवेश्वरयोर्मध्ये यदिकश्चिद्भेदः विभाति प्रामुख्येन ईश्वरः प्रभुः वर्तते जीवश्च तदधीनः। प्रत्येकस्मिन् शरीरे जीवो भवति तत्सम्बन्धात् ईश्वरोऽपि सर्वस्मिन् शरीर साक्षीरूपः मन्यते।

अज्ञानेन अहंकारस्य वशीभूतो जीवः कार्यकर्तृत्व भावमङ्गीकरोति यथा चोक्तं भगवता कृष्णेन –

'अहंकार विमूढात्मा कर्ताहमिति मन्यते'[19]

जीवे कर्तृत्वभावनाया प्राबल्यात् सुखं दुःखञ्चोत्पद्यते। ईश्वरस्य विभुस्वरूपात् कर्मणः साक्षी भवति। स च सर्वेश्वरः यत्र कुत्रापि कर्मणः भावमवजानाति । तस्माच्च शास्त्रान्तरेष्वपि –

साक्षीचेताः केवलोनिर्गुणश्च । इति भावं प्रकटयामास ।

जीवः द्विविधः बद्धः मुक्तश्च शब्दान्तरेण बद्धमुक्तः, नित्यमुक्तश्च । बद्धजीवः जन्मलब्ध्वा शुभाशुभकर्मणः फलं भुङ्क्ते। शुभाशुभकर्मणः फलात् मुक्तः पुनः गर्भगृहं नैव प्रविशति। एको विशिष्ट प्रकारकः मुक्तः यो हि कदाचिदपि गर्भस्य दुःखं नालभत्। नित्यमुक्तोऽपि द्विधा विभक्तः –

एकः भगवतः किरीटकुण्डलादिस्वरूपः अपरश्च परिजनः ईश्वरस्य। यथा रामावतारे लक्ष्मणः। वर्णनेनेदं विज्ञायते किरीटकुण्डलंकौस्तुभादिमणिगणाश्च भगवतः सायुज्यं लभन्ते। यः बद्ध जीवः सायुज्यं मोक्षं विन्दति सः किरीटादिस्वरूपं प्राप्य मुक्तो भवति।

विश्वस्य समस्ताः विभूतयः प्रभुणा श्रीरामचन्द्रेण भुक्ताः सन्ति अनया भावनया यो भक्तः तासां विभूतीनां प्रसादरूपं मत्वा स्वीकरोति स सर्वथा मुक्त एव। यः रामस्य गुणानुवादं कुर्वन् मनोवाकर्मभिः ईश्वरस्य सेवायां रतो भवति सोऽपि मुक्तो भवति। आत्मतत्वं विहाय अन्यस्मिन् भोग्यपदार्थे दुःखमनुभवति : किं वा आत्मानुभूतौ लीनो जायते तादृशः बद्धजीवश्च मुक्तो भवति। गीतायाञ्च

उक्तम् –

'ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।

आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः' ॥[20]

त्रिभिर्गुणैः प्रवृत्तमिदं विश्वम्। रजोगुणस्य बाहुल्यं दृश्यते। यद्यपि गुणानां लक्षणं सांख्यशास्त्रे प्रदत्तमस्ति।

"सत्त्वं लघुप्रकाशकमिण्टमुपण्टम्भकं चलं च रजः। गुरुवरणकं तमः।[21]

पुनश्च गीतायाम् –

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।**
**निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।**
**तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयम्।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानहा।।**
**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।**
**तन्निबध्नाति कौन्तेय कर्म संगेन देहिनम्।।**
**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**
**प्रमादालस्य निद्राभिस्तन्निबध्नाति भारत ।।**
**सत्वं सुखे सञ्जयति रजः कर्मणि भारत।**
**ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ।।**

**रजस्तमश्चाभिभूय सत्वं भवति भारत।**

**रज: सत्वं तमश्चैव तम: सत्वं रजस्तथा ॥[22]**

रजोगुण: चलनक्रिया युक्तो मन्यते। सांसारिकं सकलं कार्यजालं रजसा चलति। तम: आलस्यरूपं तथा अज्ञानरूपञ्च प्रतीयते। सत्व गुणस्योदये सति ज्ञानमुदेति । ज्ञानात् संसारात् मुक्तिं लभते । उक्तञ्च –

**"सत्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**

**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ [23]**

तस्मात् विरजानदी यावत् अस्य लोकस्य सीमा अङ्गीक्रियते। ततोऽग्रे वैकुण्ठ: मन्यते।

परम: साधक: रामभक्त: रामस्य कृपया दयया च सुषुम्नाख्यानाड्या द्वारेण शरीरात् बहिर्भूत्वा क्रमानुरोधेन दिन – पक्ष – मास – षण्मासंवत्सरादिभि: निर्गच्छन् सूर्यचन्द्रलोकौ च अतिक्रम्य तल्लोकस्थिताभि: देवताभि: पूजा अभ्यर्हणां, सम्माननं च संप्राप्य विरजायां नद्यां स्नात्वा मलापनयनं च विधाय परमपुनीत: सन् वैकुण्ठं गच्छति न तत: पुनरावर्तते।

जीव: कथं बद्धकोटौ भवति अस्य प्रश्नस्योतरं भास्करे नैव दत्तम् वस्तुत: प्रश्नोऽयं तत्र नैवागत:। यत्किमपि भवेत् जीव: कर्मप्रभावात् जन्मजन्मांतरेभ्य: मायापाशै: बद्ध: वर्तते। जीवस्य मोक्ष: कथं भविष्यति । कर्मणा बद्ध: जन्तु: कथं कर्मपाशात् विमुच्येत्। कर्मपाशात् विमुक्त्यर्थं साधनमवश्यमेव चिन्तनीयम्। पराशक्ते: प्रभावात् जीवस्य मुक्ति: सम्भवति। पराशक्ति: अनुरक्तिर्नाम्ना च विज्ञायते। नैरन्तर्येण तैलधारावत् भवगत: स्मरणं संसारात् मोचयति। स्मरणात् भक्ति: उत्पद्यते । जीवस्य परमेश्वरस्य अंश: भवति तद्यथा –

**'ममैवांशो जीवलोके जीवभूत: सनातन:[24]**

रामचरित मानसेऽपि –

ईश्वर अंश जीव अविनासी। चेतन सहज अमलसुखराशी ॥[25]

जपस्य नैरन्तरर्येण एका स्मृति: दृढा भवति तया स्मृत्या साधक: परमात्मानं प्राप्नोति । इयं स्मृति: भगवता रामेण सह भक्तस्य तादात्म्यं तनोति। सामान्येन नवधा भक्ति: विभक्ता वर्तते। येन साधक: परमात्मनि निलीनो भवति। नवधा भक्ति: तद्यथा –

**श्रवणं कीर्तनं विष्णो: स्मरणं पादसेवनम्।**

**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥**

**इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।**

**क्रियते भगवत्यद्धा सोऽपि याति परां गतिम् ॥[26]**

नवभि: प्रकारै: साधक: ईश्वरस्य समीपं गच्छति अर्थात् ईश्वरेण सह साधकस्य विशिष्ट: सम्बन्ध: स्थापितो भवति । भक्तस्य जीवने भगवता साकं येन केनापि प्रकारेण सम्बन्ध स्थापनं भवेत्। य: कश्चिदपि सम्बन्ध: साधकस्य परमोत्कृष्टं फलं प्रयच्छिति रामानन्द सम्प्रदाये भक्ते: प्राधान्यं प्राप्यते। तत्र वर्णाश्रमस्य दुराग्रह: नास्ति। यस्यां कस्यां जातावुत्पन्न: जन: पुरुषो वा स्त्री वा बालो वा वृद्धो वा मूर्खो वा धीरो वा सम्प्रदायेऽस्म् दीक्षितो भवति । रामानन्दस्य प्रमुखा: द्वादशशिष्या: सर्वासु जातीषु उत्पन्ना: विद्यन्ते । भक्ते: प्राधान्यत्वात् समग्रे देशे अस्य सम्प्रदायस्य मतस्यानुयायिन: अनेके सन्ति। अन्ये ये वैष्णव सम्प्रदाया: सन्ति तत्र वर्णव्यवस्थाया: दृढेण पालनं श्रूयते। रामानन्दसम्प्रदाय: राष्ट्रस्य एकतायां महत्त्वपूर्ण कार्यं विदधाति।

सामान्येन रामानन्दसम्प्रदाये विद्वांस: साधव: नैव दृश्यन्ते प्रायेण भजनानन्दिन: सर्वे भवन्ति किन्तु वेदान्तादिशास्त्रे कृतभूरिपरिश्रमा: परमोपासका: न्यायवेदान्ते च लब्धयशा: अनेके सन्ति। रामानन्दसम्प्रदाय: सर्वेषां वर्तते। य: कश्चिदपि अत्र दीक्षाग्रहणे समर्थ:। पाण्डित्य प्रदर्शने रामानन्दसाधूनां विश्वासो नैव दृश्यते। ते साधनायां रता: भवन्ति। तुलस्या: मालां धारयन्त: अहर्निशं जपे तल्लीना: दृश्यन्ते। भोजनादौ तादृश: कश्चित् प्रतिबन्ध: नास्ति। वैष्णव: कस्यापि जातेर्भवेत् तद्गृहे

रामानन्दसंप्रदायस्य साधुः भोक्तुं समर्थो भवति। वितंडावादस्य स्थानं कुत्रापि न दरीदृश्यते । रामनाम जपन्तः सर्वे स्वान्तः सुखं प्राप्नुवन्ति । एतेषां महात्मनां जीवनं सामाजिकानां कृते पथप्रदर्शनाय संगतिः करणाय च अलं भवति।

**सम्प्रदाय शब्दमीमांसा -**

सम्यक् प्रदीयते शिष्येभ्यः इति सम्प्रदायः[27] । सम् + प्र उपसर्ग पूर्वकात् दा धातोः घञ् कृते सम्प्रदायः पुल्लिंगशब्दः निष्पद्यते। 'अथाम्नायः सम्प्रदायः' इति कोषवचनात् गुरुपरम्परया प्राप्तः उपदेशः सम्प्रदाय पदेन व्यञ्जितो भवति। एष उपदेशः अनादि कालात् प्रचलितः सन् वेदादि भारतीय शास्त्रेषु वर्णितः वर्तते। विशिष्य उपनिषत्सु सम्प्रदायस्य बीजं संरक्षितं मन्ये।

जगद्गुरु श्रीरामानन्दाचार्यश्रीमरामेश्वरानन्दाचार्यस्य मते ऋग्वेदस्य दशममण्डले ' तमे सूक्ते सप्तमे मन्त्रे रामानन्द सम्प्रदायस्योल्लेखः प्राप्यते।

सम्प्रदाय शब्दार्थः कारिकायाम् -

**सम्यक् प्रकृष्ट दानं च मन्त्रादेः श्रुतिमूलकम्।**

**इत्यर्थः सम्प्रदायेति शब्दस्योक्तो महर्षिभिः॥**[28]

अयं भावः वैदिकमन्त्राणां सारांशतत्वं जनानामुपकाराय यः उपदिशति स खलु संप्रदायः। प्रामुख्येन चत्वारो मन्यन्ते -

श्रीः, ब्रह्म, रुद्रः, सनकादिः। कलियुगे चत्वारो वेदान्तरहस्यमर्मज्ञाः सन्ति -

रामानन्दो निम्बादित्यो विष्णु स्वामी श्री माधवः।

चत्वारो भगवद्भक्ता जगतीधर्मस्थापकः॥

एतेषामनुयायिनो द्विपञ्चाशत् विजज्ञिरे॥

चतुर्युसम्प्रदायेषु श्रीसम्प्रदायाचार्यः जगद्गुरु श्रीरामानन्दाचार्यों वर्तते । सनकादि सम्प्रदायस्य श्री निम्बार्काचार्यः, रुद्र सम्प्रदायस्य श्री विष्णुस्वामी तथा च ब्रह्मसम्प्रदायस्य माध्वाचार्यः आसीत्। चतुः सम्प्रदायानां वैष्णवाः महाकुम्भे वैष्णवैः अनीः अखाड़ा इति पदवाच्यैः साकं प्रमुखं स्नानमाचरन्ति।

चतुःसम्प्रदायमध्ये श्री रामानुजस्य स्थानं नैवाङ्गीक्रियते। श्री सम्प्रदाये लक्ष्मीनारायणयोः उपासना भवति तथा चास्य सम्प्रदायस्य प्रवर्तकः श्रीरामानुजाचार्यः वर्तते। तत्रैव वैष्णव चतुः सम्प्रदाये रामानन्दस्य सम्प्रदायः

सुप्रतिष्ठितः विदितश्चास्ति। सम्प्रदायप्रवर्तकः। आनन्दभाष्यकारः हिन्दु सनातन धर्मोद्धारकः यति सम्राट् शास्त्रावतारः भगवतो रामस्यापरो विग्रहः जगद्गुरु रामानन्दाचार्य एव मन्यते । इतिहासे यद्यपि रामानन्दसम्प्रदायस्य पृथक् गणना नैव दृश्यते यतोहि विशिष्टाद्वैत मतस्य प्रवर्तकः श्री रामनुजाचार्यः नास्ति संशयः। किन्तु अत्रेदं बोध्यं रामानुजस्य विशिष्टाद्वैत सम्प्रदायः रामानन्दात् सर्वथा भिन्न एव। इतिहासकारः ऐतिह्य तत्वमेव कालक्रमणं जन्मादिस्थानं, कृतिः, स्थूल सैद्धान्तिकमवगाहनं च कृत्वा लिखति। रामानन्द सम्प्रदायः रामानुजस्यान्तर्विभागो नास्ति इत्यपि ज्ञातव्यम्। रामानन्द सम्प्रदायस्य भगवदाचार्य प्रभृतयः तत्वचिन्तकाः सप्रमाणं स्वमतपोषणपूर्वकं परमतनिरासं चक्रुः। तैः बहुभिः प्रमाणैः रामानन्द सम्प्रदायस्य स्वातन्त्र्यं स्वीकृतम् । अस्याशयस्य सोदाहरणं वर्णनं "मध्यकालीन हिन्दी भक्तिसाहित्य की जगद्गुरु श्री स्वामी रामानन्द की देन" नाम्नि शोध ग्रन्थे डॉ रामेश्वरदास श्री वैष्णवेन कृतम्। इदं सुविदितं भारतीयानां यत् भारते भगवतः श्रीरामस्योपासनं प्राचीनकालात् प्रवर्तते। श्री राममन्त्रस्य च जपः सर्वत्र प्रसिद्धः। तद्यथा मैथिली उपनिषदि श्री सम्प्रदायस्यैका ऐतिह्य परम्परा उपलभ्यते यस्यां आचार्याणां एका शृंखला दृश्यते अन्ते च शुकाचार्यः सम्प्रदायस्यास्य मान्यः आचार्यः उद्घोषितः।

तद्यथा -

इममेव मर्नु पूर्वं साकेतपतिमवोचत्। अहं हनुमते मम प्रियाय प्रियतराय। सवेद वेदिने ब्रह्मणे। स वशिष्ठाय। स पराशराय। स व्यासाय। स शुकाय। इत्येषोपनिषत् । इत्येषा ब्रह्मविद्या।[29]

अर्थात् श्री सम्प्रदायस्य परम्परा अनेन प्रकारेण भवति –

1. अनन्तानन्तब्रह्माण्ड नायकः श्री रामः
2. भगवतीपराम्बा श्री सीता
3. श्री हनुमान्
4. श्री ब्रह्मा
5. श्री वशिष्ठः
6. श्री पराशरः
7. श्री व्यासः
8. श्री शुकः

पुनः वशिष्ठ संहितायां वर्णनं प्राप्यते –

"श्रुणु वदामिते वत्स मन्त्रराज परम्पराम्।
यस्याश्च वन्दनात् रामश्चात्यन्तं हि प्रसीदति ॥
सृष्ट्यादौ च सिसृक्षुः श्री रामो विधिं विधाय हि।
सृष्टये प्रेषयामास वेदं ज्ञानमहानिधिम्॥ तथाप्यर्थावबोधस्या भावाद्विधिः ससर्ज न।
जातायामीशभक्तौ च गुरुभक्तिर्यतो न हि ॥
भक्तिद्वये यतश्चास्ति तत्वप्रकाशहेतुता।
ततो वेदार्थबोधो न गुरोर्भक्तेरभावतः॥
ततो रामस्य खेदं हि समुद्वीक्ष्य च मैथिली।
गृहीत्वा विधिवद् रामान्मन्त्रराजं षडक्षरम् ॥
हनुमते च दत्त्वा तं राममन्त्रं षडक्षरम् ।
विधये मन्त्र दानाय प्रेरयामास मारुतिम् ॥[30]

अगस्त्य संहितायाञ्च पुनः अयमाशयः प्रकाशितः –

'ब्रह्मा ददौ वशिष्ठाय स्वसुताय मनुं ततः।
वशिष्ठोऽपि स्वपौत्राय दत्तवान् मन्त्रमुत्तमम्॥
पराशराय रामस्य मन्त्रं मुक्तिप्रदायकम्।
स वेदव्यासमुनये ददावित्थं गुरुक्रमः॥
वेदव्यास मुखेनात्र मन्त्रो भूमौ प्रकाशितः।
वेदव्यासो महातेजा शिष्येभ्यः समुपादिशत्॥[31]

अगस्त्यसंहितायां यः क्रमः निर्धारितः अध्ययनेन ज्ञायते वशिष्ठात् भिन्नः नास्ति कश्चनक्रमः। आचार्याणां परम्परा निर्बाधरूपेण तथैवास्ति । पुनः वाल्मीकि संहितायामपि सरणिः दृश्यते।

'इदं तु परमं तत्वं देवानामप्यगोचरम्।
पृष्टं युष्माभिरनद्यं कथ्यते श्रृणुतर्षयः॥
भगवान् रामचन्द्रो वै परं ब्रह्म श्रुतिश्रुतः।
दयालुः शरणं नित्यं दासानां दीनचेतसाम् ॥
इमां सृष्टिं समुत्पाद्य जीवानां हितकाम्यया।

आद्याशक्तिं महादेवी श्री सीतां जनकात्मजाम्।।
.' तारकं मन्त्रराजं तु श्रावयामास ईश्वर:।
जानकी तु जगन्माता हनुमन्तं गुणाकरम् ।।
श्रावयामास नूनं स ब्रह्माणं सुधियांवरम्।।
तस्माल्लेभे वशिर्षि: क्रमादस्मादवातरम्।
भूमौ हि राममन्त्रोऽयं योगिनां सुखद: शिव:।
एवं क्रमं समासाद्य मन्त्रराज परम्परा।।[32]

गीताया: आनन्दभाष्ये उपक्रमे एक: शोक: प्राप्यते तत्र श्रीसम्प्रदायस्य अविच्छिन्ना परम्परा उटङ्किता तद्यथा –

श्री राम जनकात्मजामनिलयं वेद्यो वशिष्ठावृषी।
योगीशं च पराशरं श्रुतिविदं व्यासं जिताक्षं शुकम्।
श्रीमन्तं पुरुषोत्तमं गुणनिधिं गङ्गाधराछान्यतीन्।
श्री मद्राघवदेशिकं च वरदं स्वाचार्यवर्यं श्रये।। [33]

समग्रस्य क्रमस्यानुसन्धानेन एक: निश्चित: क्रम: प्राप्यते यत्र द्वाविंशति: आचार्य: किं वा सम्प्रदाय प्रवर्तका: संरक्षकाश्च सन्ति । इदानीमध: समेषा नामानि क्रमेण उद्घाट्यंते –

1. भगवान् श्रीराम:
2. भवगती श्री सीता
3. श्री हनुमान्
4. श्री ब्रह्मा
5. श्री वशिष्ठ:
6. श्री पराशर:
7. श्री व्यास:
8. श्री शुकदेव:
9. श्री पुरुषोत्तमाचार्य:
10. श्री गङ्गाधराचार्य:
11. श्री सदानन्दाचार्य:
12. श्री रामेश्वरानन्दाचार्य : (प्रथम:)
13. श्री द्वारानन्दाचार्य:
14. श्री देवानन्दाचार्य:
15. श्री श्यामानन्दाचार्य:
16. श्री श्रुतानन्दाचार्य:
17. श्री चिदानन्दाचार्य:
18. श्री पूर्णानन्दाचार्य:
19. श्री श्रियानन्दाचार्य:
20. श्री हर्यानन्दाचार्य:
21. श्री राघवानन्दाचार्य:

22. आनन्दभाष्यकारः जगद्गुरुरामानन्दाचार्यः
ग्रन्थानां पर्यालोचनेन तथ्यमिदं सुस्पष्टं श्रीसम्प्रदायस्यादिप्रवर्तकः अनादिनिधनः अनन्तानन्तब्रह्माण्ड नायकः भगवान् श्रीरामः अस्ति।

सम्प्रदायेऽस्मिन् सामान्येन उपासनायां विग्रहस्य स्थितिः अनेन प्रकारेणाङ्गीक्रियते

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ।।

1.3 रामान्दसम्प्रदायस्य धर्मशास्त्रे बीजान्वेषणम् –

श्री सम्प्रदायस्यारम्भः परब्रह्म सकाशात् भगवतः रामात् मन्यते।

'रामः साक्षात् परं ब्रह्म' इति वाल्मिकिना अभाणि। तस्मात् ग्रन्थान्तरेषु
प्रोक्तं –

'अग्रतः सकलं शास्त्रं पृष्ठे सशरं धनुः'

भगवतः रामस्य चरितं महत् वर्तते। तेनैव प्रवर्तितः श्री सम्प्रदायः सांसारिकाणां आत्मोद्धरणं करोति। ऋग्वेदस्याधस्तने मन्त्रे वैष्णवाः राममन्त्रस्य बीजमन्वेषयन्ति तच्च मन्त्रः –

सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन्।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद।।[34]

अस्याः ऋचः विस्तृतं व्याख्यानं वेद रहस्य नामके ग्रन्थे ज़ुगु श्रीमता पुरुषोत्तमाचार्येण सम्पादिते श्री राघवानन्दाचार्यस्य मार्तण्ड भाष्ये कृतमस्ति।

वेदमन्त्रस्य कश्चिदपि नियतार्थः नास्ति विदुषां मेधा यादृशी भवति यया मेधया यां भावनामङ्गीकृत्य ते अर्थमिच्छन्ति तादृशोऽर्थः वेदस्य स्फुटितो भवति। तस्मात् सायणस्य यज्ञपरकः अर्थः दयानन्दस्य च पृथक् अर्थः दृश्यते। एकस्यैव ब्रह्मसूत्रस्य संप्रदायभेदेन अर्थः भिन्नः समवलोक्यते। सम्प्रदायवादिनां समेषामाधारग्रन्थः ब्रह्मसूत्रं, गीता, उपनिषच्च भवति। विद्यायाः मेधायाः चमत्कारः श्रूयते एकस्यैव मन्त्रस्य सम्प्रमाणां सम्प्रदायमताग्रहपूर्वकं अर्थं विज्ञापयति मन्त्रस्यास्य संप्रदायमध्ये लब्धव्याख्यानेन रामानन्द सम्प्रदायस्य वेदमूलकतां सिदध्यति। वेदप्रमाणं विना भारतीया जीवनशैली पूर्णतां नावहति । शब्दप्रमाणकाः वयम्। बहुत्र वेदेन साकं साक्षात् संबन्धः भवति किन्तु अनेकत्र परम्परया स सम्बन्धः कल्प्यते। वेदेन सह यस्य सम्बन्धः स सर्वमान्यः मुक्तिदायकः प्रमेयादियुक्तः सत्सिद्धान्तरूपश्च प्रोक्तः। पर्यालोचनेन सुविदितमेव रामानन्दसम्प्रदायः आम्नाय धर्मयुतः, सनातनश्च।

रामतापनीयोपनिषदि –

'रमंते योगिनोनन्ते सत्यानन्दे चिदात्मनि' इति राम पदे नासौ परब्रह्माभिधीयते।[35]

मुक्तिकोपनिषदि भगवतः रामस्य सपरिकरस्य वर्णनं लभ्यते। अयोध्यायाः नामग्रहण पूर्वकं स्मरणं दृश्यते । वर्णनेन रामभक्तेः प्राचीनता स्वीक्रियते । तद्यथा –

हरि ॐ अयोध्या नगरे रम्ये रत्नमण्डप मध्यगे। सीता भरत सौमित्री शत्रुघ्नाद्यैः समन्वितम् वशिष्ठाद्यैः शुकादिभिः अन्यै भागवतैश्चापि स्तूयमानमहर्निशम्। धीविक्रिया सहस्राणां साक्षिणं निर्विकारिणाम् ।

स्वरूपध्याननिरतं समाधि विरमे हरिम्।।
भक्त्या शुश्रूषया रामं स्तुवन्पप्रच्छ मारुतिः।
राम त्वं परमात्मासि सच्चिदानन्दविग्रहः।।

इदानीं त्वां रघुश्रेष्ठ प्रणमामि मुहुर्मुहुः।
त्वद्रूपं ज्ञातुमिच्छामि तत्वतो राममुक्तये ।।
अनायासेन येनाहं मुच्येयं भवबन्धनात्।
कृपया वद मे राम येन मुक्तो भवाम्यहम् ।।
साधु पृष्टं महाबाहो वदामि श्रृणु तत्वतः।
वेदान्ते सुप्रतिष्ठोहं वेदान्तं समुपाश्रय।।
हनुमञ्छृणु वक्ष्यामि वेदान्तस्थिति मञ्जसा।।
निःश्वासभूता मे विष्णोर्वेदा जाताः सुविस्तराः।
तिलेषु तैलवद्वेदे वेदान्तः सुप्रतिष्ठितः।
राम वेदाः कतिविधास्तेषां शाखाश्च राघव।
तासूपनिषदः काः स्युः कृपया वद तत्वतः।।

श्रीराम उवाच –

ऋग्वेदादि विभागेन वेदाश्चत्वार ईरिताः।
तेषां शाखा ह्यनेकाः स्युस्तासूपनिषदस्तथा ॥
ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसंख्यकाः।
नवाधिकशतं शाखाः यजुषो मारुतात्मज ॥
सहस्रसंख्यकया जाताः शाखाः साम्नः परं तप।
अथर्वणस्य शाखाः स्युः पञ्चाशद्भेदतो हरे।। [36]

उपनिषदः मन्त्राणामध्ययनेन वक्तुं शक्यते रामभक्तिः प्राचीनकालात् समाजे प्रचलिता आसीत्। हिमालयात् सेतु बन्धं यावत् पुनः विदेशे च रामकथायाः प्रचारः लीलामाध्यमेन श्रूयते। हिन्दवः मनोयोगेन यत्र रामभक्तौ लीनाः सन्ति तत्रैव 'इन्डोनेशिया' देशे यवनानां बाहुल्ये यवना एव रामभक्तौ समर्पिताः दृश्यन्ते । ते इस्लामधर्मावलम्बिनः रामलीला माध्यमेन रामस्य गाथां गायन्ति भित्तौ च रामस्य चित्रपट्टं तत्र द्रष्टुं शक्यते। मुक्तिकोपनिषदि द्वितीयेऽध्याये रामस्य दासः हनुमान् पृष्टवान् सिद्धि कीदृशी तथा मानव जीवने अस्याः किं प्रयोजनम्। अत्र मूलमन्त्रेनेव लिखामि –

तथा हैनं श्रीरामचन्द्रं मारुतिः पप्रच्छ।
केयं वा तत्सद्धिः सिदध्या वा किं प्रयोजनमिति।।

सहोवाच श्रीरामः –

पुरुषस्य कर्तृत्व भोक्तृत्व सुखदुःखादिलक्षणाश्चित्तधर्मः। क्लेशरूपत्वाद् बन्धो भवति। तन्निरोधनं जीवन मुक्तिः। उपाधिविनिर्मुक्तघटाकाशवत् प्रारब्ध क्षयाद्विदेहमुक्तिः। जीवन्मुक्तिविदेहमुक्त्योरष्टोत्तर शतोपनिषदः प्रमाणम्। कर्तृत्वादि दुःखनिवृत्तिद्वारा नित्यानन्दावाप्तिः प्रयोजनं भवति । तत्पुरुष प्रयत्न साध्यं भवति । यथा पुत्रकामेष्टिना पुत्रं वारणिज्यादिना वित्ते ज्योतिष्टोमेन स्वर्ग तथा पुरुषप्रयत्न साध्यवेदान्त श्रवणादि जनित समाधिना जीवन्मुक्त्यादि लाभो भवति।
सर्ववासनाक्षयात्तल्लाभः।
अत्र श्रीकाः भवन्ति –

तच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं मतम्।
तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् ।।[37]

हनुमता साकं रामचन्द्रस्य संवादः जीवानां कल्याणाय विद्यते । मुक्तिकोपनिषदि अनेके प्रश्नाः उत्थापिता समेषां शास्त्रीयं समाधानं भगवता रामचन्द्रेण दत्तम्। वासना विषये च विस्तरेण अस्यां प्रतिपादितम्। ज्ञानमिदं लब्ध्वा साधकः आत्मोद्धाराय सन्नद्धो भवति यथाचाह –

बद्धो हि वासनाबद्धो मोक्षः स्व्याद्वासनाक्षयः।
वासनां संपरित्यज्य मोक्षार्थित्वमपि त्यज ।
मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः।
मैत्र्यादिवासनानाम्नीगुहाणामलवासनाः ।
ता अप्यतः परित्यज्य ताभिर्व्यवहरन्नपि॥
अन्तः शान्तः समस्नेहो भव चिन्मात्र वासनः।
तामप्यथ परित्यज्य मनोबुद्धिसमन्विताम्॥

शेषस्थिरसमाधानो मयि त्वं भव मारुते। अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। अनामगोत्रं मम रूपमीदृशं भजस्व नित्यं पवनात्मजार्तिहन्। दृशिस्वरूपं गगनोपमं परं सकृविभातं त्वजमेकमक्षरम् । अलेपकं सवर्गतं यदद्वयं तदेव चाहं सकलं विमुक्त ऊँ।[38]

श्री हनुमन्नाटके च –

इदं शरीरं शत संधि जर्जरं पतत्यवश्यं परिणाम दुर्वहम्।
किमौषधं पृच्छसि मूढ दुर्मते निरामयं राम रसायनं पिब ॥

अयं भावः शरीरमिदं वार्धक्यरोगादिकारणैश्च नष्टप्रायं जातम् तथा च विनाशशीलमेव विभाति संसारे औषधं नास्ति केवलं रामनामरूपं रसायनं शरीरे अमृतत्वं बिभर्ति । शरीरं च कृतकृत्यं जायते।

वराहपुराणे शंकरः पार्वतीं प्रोक्तवान् –

देवाच्छूकरशावकेन निहतो म्लेच्छो जराजर्जरी।
हा रामेण हतोस्मि भूमि पतितो जल्पं तनुं त्यक्तवान् ।
तीर्णा गोष्पदवद् भवार्णव महोनाम्नः प्रभावात्पुनः
किंचिन्न यदि रामनाम रसिकास्ते यान्ति रामास्पदम् ॥[39]

पद्मपुराणे रामनाम्नः माहात्म्यं बहुधा वर्णितम्। रामनामसमं अन्यत् नाम नास्ति । एकं रामनाम सहस्रनाम तुल्यं प्रतीयते। अनुष्ठानादिभिः काम्यप्रयोगैश्च यत् यत् फलं प्रोक्तं तत्सर्वं लभते रामनाम्नः जपात्। तन्त्रस्य च सम्पूर्णं फले अस्मिन् जपानुष्ठाने निहितम् यथा चाह –

राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं राम नाम वरानने ॥
ये वै प्रयोगस्तन्त्रेषु तैस्तैर्यत्साध्यते फलम् ।
तत्सर्वं सिद्ध्यति क्षिप्रं रामनाम्नैव कीर्तनात् ।।[40]

नृसिंहपुराणे भक्तराजप्रह्लादस्य कथनं जगति प्रसिद्धमेव। रामनामजापकः जीवने भयं नैव अनुभवति । जपप्रभावात् अग्निरपि शीतत्वमवाप। प्रह्लादस्य दैवी सम्पद् रामनाम्नः जपसकाशात् समागता आसीत्। दैत्यराजः प्रह्लादं हन्तुं बहुनुपायान् चकार तत्रैव अग्निमध्ये पतितोऽपि प्रह्लादः न ममार यथा भणितम् –

रामनाम जपतां कुतो भयं सर्वताप शमनैक भेषजम् ।[41]

पश्यतात मम गात्र सन्निधौ पावकोऽपि सलिलायतेधुना ब्रह्मयामलतन्त्रस्याधस्तन धोका प्रमाणभूताः विद्यन्ते –

रामनाम सदानन्दो राम नाम सदा गतिः।
रामनाम सदा तुष्टौ राम नाम स्वरूपकः॥
रामनाम परो वेदो रामनाम सदाशुचिः।
रामनाम परो योगो रामनाम परो ध्वनिः॥
रामनाम परं बीजं रामनाम परं जगत्।
रामनाम परो मन्त्री रामनाम परा क्रिया॥
रामनाम परो यज्ञो रामनाम परो जपः।
रामनाम परं सारं रामो लक्ष्मी समावृत्तः ।।[42]

काशीखण्डे च –

पेयं पेयं श्रवण पुटके रामनामाभिरामम्।
ध्येयं ध्येयं मनसि सततं तारकं ब्रह्मरूपम्॥
जल्पन् जल्पं प्रकृति विकृतौ प्राणिनां कर्णमूले।
वीथ्यां वीथ्यामटति जटिलः कोऽपि काशीनिवासी॥

सनत् कुमार संहितायां युधिष्ठिरं प्रति व्यासस्य सम्बोधनम् –

श्री रामेति परं जाप्यं तारकं ब्रह्म संज्ञकम्।
ब्रह्म हत्यादि पापहनमिति वेद विदो विदुः॥

हिरण्यगर्भ संहितायां अगस्त्यस्यवचनं –

अभिरामेति यन्नाम कीर्तितं विवशैश्च यैः।
तेपि ध्वस्ताखिलाघौघायांति विष्णुं परं पदम् ।।

महाशंभु संहितायां रामं सम्बोधयन्ती जानकी प्राह –

रामेति नाममात्रस्य प्रभावमिति दुर्गमम्।
मृगयन्ति तु यद्वेदाः कुतो मन्त्रस्य ते प्रभो॥

श्री मन्महारामायणे पार्वतीं प्रति शिवस्य वचनं –

अंशाशै राम नाम्नश्च त्रयः सिद्धा भवंति हि।
बीजमोंकार सोऽहं च सूत्रमुक्तमितिश्रुतिः॥
परमेश्वर नामानि संत्यनेकानि पार्वति।
परन्तु राम नामेदं सर्वेषामुत्तमोत्तमम्॥
रामस्यैव रमु क्रीडा नाम्नो नान्यस्य जायते।
जीवित एव रामस्य स्मरणेन गतिं व्रजेत् ॥

अन्यत्रापि च

सप्तकोटि महामन्त्राश्चित्त विभ्रमकारकाः।
एक एव परो मन्त्रो राम इत्यक्षरद्वयम्॥

समेषां सिद्धान्त इत्थमेव –

यश्चाण्डालोपि रामेति वाचं वदेत् तेन सह तेन सह संवसेत् तेन सहसंवदेत् तेन सह सभुञ्जीयात्।

भारतीय समुपलब्ध संस्कृत वाङ्मये सर्वत्र भगवतः रामस्य गुणानुवादः सूत्ररूपे, मन्त्ररूपे, कथारूपे, आख्यानरूपे च दरीदृश्यते। तात्पर्यमिदमस्ति रामः भारतराष्ट्रस्य कणे कणे निहितः। सुदर्शन संहितायाः वचनं श्रूयते महात्मनां मध्ये

मत्स्यश्च राम हृदयं तथा गुरु जनार्दनः।
कूर्मश्चाधारशक्तिश्च वाराहोभुजयोर्बलम्॥
नरसिंहो महाकोपो वामन कटिमेखला।
भार्गवो जंघयो जातो बलरामश्च पृष्ठतः।
बौद्धश्च करुणा साक्षात् कल्की चित्तस्य हर्षतः।
कृष्णः शृंगाररूपश्च वृन्दावन विभूषणः॥
एतांश्चांशं कलाचैव रामस्तु भगवान् स्वयम्॥

भरद्वाज संहितायाञ्च श्रूयते –

अवतारा बहवः सन्ति कस्याश्चांश विभूतयः।
राम एव परं ब्रह्म सच्चिदानन्दमव्ययम्॥
सर्वेषामवताराणामवतारो रघूत्तमः।
सरिता सर्व मध्येषु सरयू पावनी यथा ।।

जगदिदं भवगतः स्वरूपमेव। समये समये धर्मस्य निन्दकाः अधर्मसमर्थकाः, वेदविदूषकाः गोब्राह्मणानां सज्जनानाञ्च क्लेशः वर्द्धन्ते तस्मिन् काले भगवतः अवतरणं भवति। तच्चावतरणं कदाचित् क्षुद्रजन्तुस्वरूपमङ्गीकारेण कदाचिच्च मानवदेहधारणेन पठ्यते। अवतारे बीजं सर्वत्र तुल्यमेव भवति यथा चाह गीतायाम् –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म संस्थापनार्थाय संभवामि युगे युगे॥ [43]

रामचरितमानसे च गोस्वामिना भणितम् –

जब जब होय धरम के हानी । बाढहि असुर अधम अभिमानी।
तब तब प्रभु धरि मनुज शरीरा । हरहि कृपानिधि सजन पीरा ।।[44]

भगवतः रामस्यावतरणं राक्षसानां वधाय केवलं नैवाभवत् – प्रत्युत
माणां व्यवहार शिक्षणमपि आवश्यकं भवति उक्तञ्च –
"मावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव नहि केवलं विभुः[45]
पुनश्च रामचरित मानसे –

विप्रधेनु सुरसन्त हित लीन्ह मनुज अवतार ।
निज इच्छा निर्मित तनु माया गुण गोपार ।।[46]

भगवतः रामस्यावतरणं समाजे स्पर्शास्पर्शदोषापाकरणायाङ्गीक्रियते विदवद्भिः। रामस्य सहचराः सहयोगिनः शबरी गृद्धनिषाद – वानर निशिचरप्रभृतयः तथाकथिताः हीनजातयः सन्ति। तस्मात् वैष्णव सम्प्रदाये रामानन्दे विशिष्य वर्णभेदः नैव स्वीक्रियते। रामानन्दस्य प्रादुर्भावः सामाजिकानां
मैत्रीभाव स्थापनाय, समरसाय, परस्परसहयोगाय तेनैव राष्ट्रसंवर्द्धनाय चाभवत् । तस्मात् रामानन्दः शास्त्रेषु भगवतः रामस्य साक्षात् प्रतिमूर्तिः विद्यते उक्तञ्च –

"रामानन्दः स्वयं रामो प्रादुर्भूतो महीतले"

श्रीसम्प्रदायस्य मान्यः आचार्यः श्रीरामानन्दः श्री राघवानन्दाचार्यात् विरक्त दीक्षां स्वीकृत्य परम्परया प्राप्तं षडक्षरं श्री राममन्त्रं अनन्तानन्दाचार्य प्रभृतिभ्यः शिष्येभ्यः दीक्षां ददौ। शिष्येषु कबीर रविदाससेन – धन्नाश्च हीनजातावुत्पन्नाः सन्ति ।

**सन्दर्भग्रन्थाः –**


1. रामायण सुन्दरकाण्डम्
2. शुक्लयजुर्वेदः
3. 'शतपथब्राह्मणम्।
4. आह्निकसूत्रावली पृष्ठ 118
5. पुराणसंग्रहे
6. आह्निकसूत्रावलिः पृ 118
7. आह्निकसूत्रावलिः पृ 118
8. श्रीमद्भगवद्गीता
9. धुमणिः – सूर्यः
10. वाजसनेयि आह्निक सूत्रावलिः पृष्ठ 119
11. 'वाजसनेयि आह्निकसूत्रावलिः पृष्ठ 119
12. श्रीमद्भागवतम्।
13. 'स्मृतिसंग्रहः।
14. 'श्रीमद्देवीभागवतमहापुराणम्।
15. श्रीमद्भगवद्गीता
16. श्रीमद्भगवद्गीता
17. 'नारदभक्तिसूत्रम्
18. श्रीमद्भगवद्गीता। अध्याय
19. श्रीमद्भगवद्गीता अध्याय
20. श्रीमद्भगवद्गीता 5-22
21. सांख्यकारिका
22. श्रीमद्भगवद्गीता 14.5-10 श्रोकाः
23. श्रीमद्भगवद्गीता 14.17
24. श्रीमद्भगवद्गीता
25. श्रीमद्रामचरितमानस
26. 'वाजसनेयि आह्निकसूत्रावलिः पृष्ठ 147
27. 'ललिता सहस्रनामावलिः (सौभाग्य भास्कर व्याख्या)
28. 'लोकार्पण स्मारिका जः रामानन्दाचार्यः राज़्संवि जयपुर
29. 'श्रीमैथिलीमहोपनिषद् – 5
30. श्री वशिष्ठसंहिता

31. श्री अगस्त्यसंहिता
32. 'श्री वाल्मीकिसंहिता
33. श्री मद्भगवद्गीता आनन्दभाष्यम्।
34. ऋग्वेदः – 10.111.7
35. 'श्री रामतापनीयोपनिषद्
36. 'मुक्तिकोपनिषद् – प्रथमाध्यायात्।
37. 'मुक्तिकोपनिषद् द्वितीयोध्यायः
38. 'मुक्तिकोपनिषद् 2.68–73
39. वराहपुराणम्
40. 'पद्मपुराणम्
41. 'नृसिंहपुराणम्
42. 'ब्रह्मयामल तन्त्रम्
43. 'श्रीमद्भगवद्गीता
44. श्रीमद्रामचरितमानस
45. श्रीमद्भागवतम्
46. 'श्रीमद्रामचरितमानस बालकाण्डम्